# Hamsagita from Shrimad Bhagavata Purana Skandha 11

# હંસગીતા ભાગવતપુરાણે એકાદશસ્કન્ધે

## Document Information

Text title : haMsagItA bhAgavatAntargataM

File name : hamsagiitaabhAgavata.itx

Category : gItA, giitaa

Location : doc_giitaa

Proofread by : Sunder Hattangadi PSA Easwaran

Description-comments : Skandha 11 Adhyaya 13 Bhagavata Purana

Latest update : June 9, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# હંસગીતા ભાગવતપુરાણે એકાદશસ્કન્ધે

શ્રીભગવાનુવાચ ।
સત્ત્વં રજસ્તમ ઇતિ ગુણા બુદ્ધેર્ન ચાત્મનઃ ।
સત્ત્વેનાન્યતમૌ હન્યાત્સત્ત્વં સત્ત્વેન ચૈવ હિ ॥ ૧૩.૧॥

સત્ત્વાદ્ધર્મો ભવેદ્વૃદ્ધાત્પુંસો મદ્ભક્તિલક્ષણઃ ।
સાત્ત્વિકોપાસયા સત્ત્વં તતો ધર્મઃ પ્રવર્તતે ॥ ૧૩.૨॥

ધર્મો રજસ્તમો હન્યાત્સત્ત્વવૃદ્ધિરનુત્તમઃ ।
આશુ નશ્યતિ તન્મૂલો હ્યધર્મ ઉભયે હતે ॥ ૧૩.૩॥

આગમોઽપઃ પ્રજા દેશઃ કાલઃ કર્મ ચ જન્મ ચ ।
ધ્યાનં મન્ત્રોઽથ સંસ્કારો દશૈતે ગુણહેતવઃ ॥ ૧૩.૪॥

તત્તત્સાત્ત્વિકમેવૈષાં યદ્યદ્વૃદ્ધાઃ પ્રચક્ષતે ।
નિન્દન્તિ તામસં તત્તદ્રાજસં તદુપેક્ષિતમ્ ॥ ૧૩.૫॥

સાત્ત્વિકાન્યેવ સેવેત પુમાન્સત્ત્વવિવૃદ્ધયે ।
તતો ધર્મસ્તતો જ્ઞાનં યાવત્સ્મૃતિરપોહનમ્ ॥ ૧૩.૬॥

વેણુસઙ્ઘર્ષજો વહ્નિર્દગ્ધ્વા શામ્યતિ તદ્વનમ્ ।
એવં ગુણવ્યત્યયજો દેહઃ શામ્યતિ તત્ક્રિયઃ ॥ ૧૩.૭॥

ઉદ્ધવ ઉવાચ ।
વિદન્તિ મર્ત્યાઃ પ્રાયેણ વિષયાન્પદમાપદામ્ ।
તથાપિ ભુઞ્જતે કૃષ્ણ તત્કથં શ્વખરાજવત્ ॥ ૧૩.૮॥

શ્રીભગવાનુવાચ ।
અહમિત્યન્યથાબુદ્ધિઃ પ્રમત્તસ્ય યથા હૃદિ ।
ઉત્સર્પતિ રજો ઘોરં તતો વૈકારિકં મનઃ ॥ ૧૩.૯॥

રજોયુક્તસ્ય મનસઃ સઙ્કલ્પઃ સવિકલ્પકઃ ।

તતઃ કામો ગુણધ્યાનાદ્દુઃસહઃ સ્યાદ્ધિ દુર્મતેઃ ॥ ૧૩.૧૦॥

કરોતિ કામવશગઃ કર્માણ્યવિજિતેન્દ્રિયઃ ।
દુઃખોદર્કાણિ સમ્પશ્યન્ રજોવેગવિમોહિતઃ ॥ ૧૩.૧૧॥

રજસ્તમોભ્યાં યદપિ વિદ્વાન્વિક્ષિપ્તધીઃ પુનઃ ।
અતન્દ્રિતો મનો યુઞ્જન્દોષદૃષ્ટિર્ન સજ્જતે ॥ ૧૩.૧૨॥

અપ્રમત્તોઽનુયુઞ્જીત મનો મય્યર્પયઞ્છનૈઃ ।
અનિર્વિણ્ણો યથાકાલં જિતશ્વાસો જિતાસનઃ ॥ ૧૩.૧૩॥

એતાવાન્યોગ આદિષ્ટો મચ્છિષ્યૈઃ સનકાદિભિઃ ।
સર્વતો મન આકૃષ્ય મય્યદ્ધાવેશ્યતે યથા ॥ ૧૩.૧૪॥

ઉદ્ધવ ઉવાચ ।
યદા ત્વં સનકાદિભ્યો યેન રૂપેણ કેશવ ।
યોગમાદિષ્ટવાનેતદ્રૂપમિચ્છામિ વેદિતુમ્ ॥ ૧૩.૧૫॥

શ્રીભગવાનુવાચ ।
પુત્રા હિરણ્યગર્ભસ્ય માનસાઃ સનકાદયઃ ।
પપ્રચ્છુઃ પિતરં સૂક્ષ્માં યોગસ્યૈકાન્તિકીં ગતિમ્ ॥ ૧૩.૧૬॥

સનકાદય ઊચુઃ ।
ગુણેષ્વાવિશતે ચેતો ગુણાશ્ચેતસિ ચ પ્રભો ।
કથમન્યોન્યસન્ત્યાગો મુમુક્ષોરતિતિતીર્ષોઃ ॥ ૧૩.૧૭॥

શ્રીભગવાનુવાચ ।
એવં પૃષ્ટો મહાદેવઃ સ્વયમ્ભૂર્ભૂતભાવનઃ ।
ધ્યાયમાનઃ પ્રશ્નબીજં નાભ્યપદ્યત કર્મધીઃ ॥ ૧૩.૧૮॥

સ મામચિન્તયદ્દેવઃ પ્રશ્નપારતિતીર્ષયા ।
તસ્યાહં હંસરૂપેણ સકાશમગમં તદા ॥ ૧૩.૧૯॥

દૃષ્ટ્વા માં ત ઉપવ્રજ્ય કૃત્વા પાદાભિવન્દનમ્ ।
બ્રહ્માણમગ્રતઃ કૃત્વા પપ્રચ્છુઃ કો ભવાનિતિ ॥ ૧૩.૨૦॥

ઇત્યહં મુનિભિઃ પૃષ્ટસ્તત્ત્વજિજ્ઞાસુભિસ્તદા ।
યદવોચમહં તેભ્યસ્તદુદ્ધવ નિબોધ મે ॥ ૧૩.૨૧॥

વસ્તુનો યદ્યનાનાત્વ આત્મનઃ પ્રશ્ન ઈદૃશઃ ।

કથં ઘટેત વો વિપ્રા વક્તુર્વા મે ક આશ્રયઃ ॥ ૧૩.૨૨॥

પઞ્ચાત્મકેષુ ભૂતેષુ સમાનેષુ ચ વસ્તુતઃ ।
કો ભવાનિતિ વઃ પ્રશ્નો વાચારમ્ભો હ્યનર્થકઃ ॥ ૧૩.૨૩॥

મનસા વચસા દૃષ્ટ્યા ગૃહ્યતેઽન્યૈરપીન્દ્રિયૈઃ ।
અહમેવ ન મત્તોઽન્યદિતિ બુધ્યધ્વમઞ્જસા ॥ ૧૩.૨૪॥

ગુણેષ્વાવિશતે ચેતો ગુણાશ્ચેતસિ ચ પ્રજાઃ ।
જીવસ્ય દેહ ઉભયં ગુણાશ્ચેતો મદાત્મનઃ ॥ ૧૩.૨૫॥

ગુણેષુ ચાવિશચ્ચિત્તમભીક્ષ્ણં ગુણસેવયા ।
ગુણાશ્ચ ચિત્તપ્રભવા મદ્રૂપ ઉભયં ત્યજેત્ ॥ ૧૩.૨૬॥

જાગ્રત્સ્વપ્નઃ સુષુપ્તં ચ ગુણતો બુદ્ધિવૃત્તયઃ ।
તાસાં વિલક્ષણો જીવઃ સાક્ષિત્વેન વિનિશ્ચિતઃ ॥ ૧૩.૨૭॥

યર્હિ સંસૃતિબન્ધોઽયમાત્મનો ગુણવૃત્તિદઃ ।
મયિ તુર્યે સ્થિતો જહ્યાત્ત્યાગસ્તદ્ગુણચેતસામ્ ॥ ૧૩.૨૮॥

અહઙ્કારકૃતં બન્ધમાત્મનોઽર્થવિપર્યયમ્ ।
વિદ્વાન્નિર્વિદ્ય સંસારચિન્તાં તુર્યે સ્થિતસ્ત્યજેત્ ॥ ૧૩.૨૯॥

યાવન્નાનાર્થધીઃ પુંસો ન નિવર્તેત યુક્તિભિઃ ।
જાગર્ત્યપિ સ્વપન્નજ્ઞઃ સ્વપ્ને જાગરણં યથા ॥ ૧૩.૩૦॥

અસત્ત્વાદાત્મનોઽન્યેષાં ભાવાનાં તત્કૃતા ભિદા ।
ગતયો હેતવશ્ચાસ્ય મૃષા સ્વપ્નદૃશો યથા ॥ ૧૩.૩૧॥

યો જાગરે બહિરનુક્ષણધર્મિણોઽર્થાન્
ભુઙ્ક્તે સમસ્તકરણૈર્હૃદિ તત્સદૃક્ષાન્ ।
સ્વપ્ને સુષુપ્ત ઉપસંહરતે સ એકઃ
સ્મૃત્યન્વયાત્ત્રિગુણવૃત્તિદૃગિન્દ્રિયેશઃ ॥ ૧૩.૩૨॥

એવં વિમૃશ્ય ગુણતો મનસસ્ત્ર્યવસ્થા
મન્માયયા મયિ કૃતા ઇતિ નિશ્ચિતાર્થાઃ ।
સઞ્છિદ્ય હાર્દમનુમાનસદુક્તિતીક્ષ્ણ-
જ્ઞાનાસિના ભજત માખિલસંશયાધિમ્ ॥ ૧૩.૩૩॥

ઈક્ષેત વિભ્રમમિદં મનસો વિલાસં

દૃષ્ટં વિનષ્ટમતિલોલમલાતચક્રમ્ ।
વિજ્ઞાનમેકમુરુધેવ વિભાતિ માયા
સ્વપ્નસ્ત્રિધા ગુણવિસર્ગકૃતો વિકલ્પઃ ॥ ૧૩.૩૪॥

દૃષ્ટિં તતઃ પ્રતિનિવર્ત્ય નિવૃત્તતૃષ્ણ-
સ્તૂષ્ણીં ભવેન્નિજસુખાનુભવો નિરીહઃ ।
સન્દૃશ્યતે ક્વ ચ યદીદમવસ્તુબુદ્ધ્યા
ત્યક્તં ભ્રમાય ન ભવેત્સ્મૃતિરાનિપાતાત્ ॥ ૧૩.૩૫॥

દેહં ચ નશ્વરમવસ્થિતમુત્થિતં વા
સિદ્ધો ન પશ્યતિ યતોઽધ્યગમત્સ્વરૂપમ્ ।
દૈવાદપેતમથ દૈવવશાદુપેતં
વાસો યથા પરિકૃતં મદિરામદાન્ધઃ ॥ ૧૩.૩૬॥

દેહોઽપિ દૈવવશગઃ ખલુ કર્મ યાવત્
સ્વારમ્ભકં પ્રતિસમીક્ષત એવ સાસુઃ ।
તં સપ્રપઞ્ચમધિરૂઢસમાધિયોગઃ
સ્વાપ્નં પુનર્ન ભજતે પ્રતિબુદ્ધવસ્તુઃ ॥ ૧૩.૩૭॥

મયૈતદુક્તં વો વિપ્રા ગુહ્યં યત્સાઙ્ખ્યયોગયોઃ ।
જાનીત માઽઽગતં યજ્ઞં યુષ્મદ્ધર્મવિવક્ષયા ॥ ૧૩.૩૮॥

અહં યોગસ્ય સાઙ્ખ્યસ્ય સત્યસ્યર્તસ્ય તેજસઃ ।
પરાયણં દ્વિજશ્રેષ્ઠાઃ શ્રિયઃ કીર્તેર્દમસ્ય ચ ॥ ૧૩.૩૯॥

માં ભજન્તિ ગુણાઃ સર્વે નિર્ગુણં નિરપેક્ષકમ્ ।
સુહૃદં પ્રિયમાત્માનં સામ્યાસઙ્ગાદયોઽગુણાઃ ॥ ૧૩.૪૦॥

ઇતિ મે છિન્નસન્દેહા મુનયઃ સનકાદયઃ ।
સભાજયિત્વા પરયા ભક્ત્યાગૃણત સંસ્તવૈઃ ॥ ૧૩.૪૧॥

તૈરહં પૂજિતઃ સમ્યક્સંસ્તુતઃ પરમર્ષિભિઃ ।
પ્રત્યેયાય સ્વકં ધામ પશ્યતઃ પરમેષ્ઠિનઃ ॥ ૧૩.૪૨॥

॥ ઇતિ ભાગવતપુરાણે એકાદશસ્કન્ધાન્તર્ગતા હંસગીતા સમાપ્તા ॥

Skandha 11 Adhyaya 13 Bhagavata Purana.

Proofread by Sunder Hattangadi

PSA Easwaran

*Hamsagita from Shrimad Bhagavata Purana Skandha 11*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*